**R/P/P/2025/II**

प्रश्न-पुस्तिका क्र.
Question Booklet No.

# विषय-संस्कृत पारम्परिक विषय
# Subject-Sanskrit Traditional Subjects

द्वितीय प्रश्न-पत्र ( ऐच्छिक )
Paper II (Optional)

विषय कोड-27
Subject-Code-27

**SET A**

252700149

नाम
Name

अनुक्रमांक
Roll No.

परीक्षार्थी अपना अनुक्रमांक दिए गए खानों में लिखें।
Candidate should write his/her Roll No. in the given boxes.

मुद्रित पृष्ठों की संख्या/No. of Printed Pages : 12
कुल प्रश्नों की संख्या/Total No. of Questions : 100
समय : 3 घण्टे प्रथम व द्वितीय प्रश्न-पत्र मिलाकर हल करने हेतु
अधिकतम पूर्णांक/Maximum Marks : 200
Time Allowed : 3 Hours to complete both Ist and IInd question paper

## परीक्षार्थियों के लिए निर्देश

1. प्रत्येक प्रश्न में चार विकल्प हैं । प्रत्येक प्रश्न का केवल एक ही उत्तर सही है । उचित विकल्प चुनें और उत्तर-पत्रक ( ओ.एम.आर. शीट ) पर सम्बन्धित वृत्त को काले बॉल प्वॉइंट पेन से काला करें ।
2. इस परीक्षा में दो प्रश्न-पत्र हैं जिसमें कुल मिलाकर 150 वस्तुनिष्ठ प्रकार के प्रश्न हैं तथा प्रत्येक प्रश्न 2 अंक का है । दोनों प्रश्न-पत्र व सभी प्रश्न अनिवार्य हैं । प्रत्येक सही उत्तर के लिए 2 अंक दिये जायेंगे । अनुत्तरित प्रश्न के लिये कोई अंक नहीं है । ऋणात्मक मूल्यांकन का प्रावधान नहीं हैं ।

| | | |
|---|---|---|
| प्रश्न-पत्र I | सामान्य प्रश्न-पत्र | ( प्रश्न संख्या 1-50 ) |
| प्रश्न-पत्र II | परीक्षार्थी द्वारा चयनित विषय का प्रश्न-पत्र | ( प्रश्न संख्या 51-150 ) |

3. इस प्रश्न-पुस्तिका में पृष्ठों की संख्या आवरण पृष्ठ पर दर्शाई गई है । परीक्षार्थी को सलाह दी जाती है कि वे सुनिश्चित करें कि प्रश्न-पुस्तिका के सभी पृष्ठ ठीक से मुद्रित और जिल्दबंद हों । अन्यथा वे उसी सेट की दूसरी प्रश्न-पुस्तिका तत्काल माँग लें ।
4. कृपया उत्तर-पत्रक ( ओ.एम.आर. शीट ) पर निर्धारित स्थानों पर ही आवश्यक प्रविष्टियाँ करें, अन्य स्थानों पर नहीं ।
5. परीक्षार्थी सभी रफ कार्य प्रश्न-पुस्तिका के निर्धारित स्थान पर ही करें, अन्यत्र कहीं नहीं तथा उत्तर-पत्र ( ओ.एम.आर. शीट ) पर भी नहीं ।
6. किसी प्रकार का केल्कुलेटर, लॉग. टेबल व किसी प्रकार का इलेक्ट्रानिक डिवाइस आदि का प्रयोग वर्जित है ।
7. जब आपको प्रश्न-पुस्तिका खोलने का निर्देश दिया जाये उसके पश्चात् ही उत्तर-पत्रक ( ओ.एम.आर. शीट ) में उत्तर को चिन्हित करने के लिये केवल काले बॉल प्वॉइंट पेन का प्रयोग करें ।
8. परीक्षा समाप्त होने के पश्चात् ओ.एम.आर. शीट वीक्षक को सौंपने के पश्चात् ही अभ्यर्थी कक्ष छोड़ेंगे ।
9. उत्तर-पत्रक ( ओ.एम.आर. ) पर उत्तर देने से पहले दिए गए निर्देशों का पालन करना सुनिश्चित करें ।

## INSTRUCTIONS TO THE CANDIDATES

1. Each question has four options. There is only one correct answer to each question. Choose the appropriate option and darken/blacken the corresponding circle on the Answer Sheet (OMR Sheet) with black point pen.
2. In this examination there are two question papers, consisting of 150 objective type questions and each question carries 2 marks. Both the question papers and all the questions are compulsory. Two (2) marks shall be awarded for each correct answer. Unanswered question will not be given any marks. There is no provisions for Negative Marking.

| | | |
|---|---|---|
| Paper I | General paper | (Q. No. 1-50) |
| Paper II | Question paper on the Subject opted by the examinee | (Q. No. 51-150) |

3. No. of pages consisting of this question booklet is indicated over the cover page. Candidates are advised to ensure that all the pages of Question Booklet are properly printed and binded. Otherwise they may demand the other Question Booklet of the same set.
4. Kindly make necessary entries on the Answer Sheet (OMR Sheet) only at the places indicated and nowhere else.
5. Examinee should do all rough work on the spaces meant for rough work on the pages given in the Question Booklet and nowhere else, not even on the Answer Sheet (OMR Sheet).
6. Use of any type of calculator, log table or any type of electronic devices etc. are not allowed.
7. Use only black ball point pen to mark the answers in the Answer Sheet (OMR Sheet) only after you are instructed to open the Question Booklet.
8. Candidates will leave the Examination Hall only after handing over the Answer Sheet (OMR Sheet) to the Invigilator at the end of the examination.
9. Before answering on Answer Sheet (OMR Sheet) ensure to follow the instructions given for that.

SEAL

(SPACE FOR ROUGH WORK)

रफ़ कार्य के लिए जगह

mpcareer.in

51. विदन्ति धर्ममनेनेति –

(A) धार्मिकः (B) वेदः

(C) वैदिकः (D) देवः

52. ऋग्वेदसंहितायां सर्गविचारः न विद्यते –

(A) अग्नि (1.1) सूक्ते

(B) नासदीय सूक्ते

(C) हिरण्यगर्भसूक्ते

(D) पुरुषसूक्ते

53. शतपथं ब्राह्मणं विद्यते –

(A) मैत्रायणी संहितायाम्

(B) तैत्तिरीय संहितायाम्

(C) काण्व संहितायाम्

(D) माध्यन्दिन संहितायाम्

54. शांखायनब्राह्मणे अध्यायसंख्या वर्तते –

(A) दश (B) विंशतिः

(C) त्रिंशत् (D) चत्वारिशत्

55. पञ्चमहायज्ञाः कस्य कृते अनिवार्याः ?

(A) ब्रह्मचारिणः (B) गृहस्थस्य

(C) देवस्य (D) जातकस्य

56. यस्तु सर्वाणिभूतान्यात्मन्येवानुपश्यति ।

सर्वभूतेषु चात्मानं ततो…………।।

(A) न हन्यते (B) न लिप्यते

(C) न उपासते (D) न विजुगुप्सते

57. पञ्चपादछन्दः वर्तते –

(A) पंक्तिः (B) जगती

(C) वृहती (D) अतिजगती

58. उत्पन्नस्य सत्त्वस्यावधारणं नाम किम् ?

(A) जायते (B) वर्धते

(C) अस्ति (D) विनश्यति

59. स्वरितादनुदात्तं यत्तत्सर्वं कथ्यते –

(A) अनुदात्तम् (B) प्रचयम्

(C) स्वरितम् (D) अप्रचयम्

60. तुरीयं वाचो के वदन्ति ?

(A) मनुष्याः (B) देवाः

(C) पशवः (D) यक्षाः



mpcareer.in

61. 'बिम्बोष्ठ:' इति पदे भवति –

(A) गुण:
(B) वृद्धि:
(C) दीर्घ:
(D) पररूपम्

62. 'सर्पिष्टमम्' इति पदे भवति –

(A) ष्टुत्वम्
(B) श्चुत्वम्
(C) सत्वम्
(D) पररूपम्

63. क्रियामात्रविषयं व्यापारनियतं च भवति –

(A) करणत्वम्
(B) कर्मत्वम्
(C) हेतुत्वम्
(D) सम्प्रदानत्वम्

64. अशिष्टव्यवहारे दाण: प्रयोगे किं भवति ?

(A) चतुर्थ्यर्थे तृतीया
(B) चतुर्थ्यर्थे द्वितीया
(C) चतुर्थ्यर्थे पञ्चमी
(D) चतुर्थ्यर्थे प्रथमा

65. निमित्तात् कर्मयोगे का विभक्ति: ?

(A) प्रथमा
(B) षष्ठी
(C) द्वितीया
(D) सप्तमी

66. समासशास्त्रे प्रथमानिर्दिष्टस्य पदस्य का संज्ञा ?

(A) उपसर्जनसंज्ञा
(B) अनुपसर्जनसंज्ञा
(C) प्रातिपदिकसंज्ञा
(D) धातुसंज्ञा

67. 'चोरभयम्' इत्यस्य लौकिकविग्रहवाक्यम् अस्ति –

(A) चोराद् भयम्
(B) चोरेषु भयम्
(C) चोरश्च भयञ्च
(D) चोराय भयम्

68. 'द्वित्रा:' इत्यत्र क: समास: ?

(A) द्वन्द्व:
(B) तत्पुरुष:
(C) बहुव्रीहि:
(D) अव्ययीभाव:

69. 'जेयम्' इति रूपे क: प्रत्यय: ?

(A) यत्
(B) ण्यत्
(C) क्यङ्
(D) क्यच्

70. 'गौष्ठीन:' इत्यत्र प्रत्ययो भवति –

(A) अण्
(B) अक्
(C) ठक्
(D) खञ्

**71.** अधोलिखितेषु कस्य गणना नक्षत्रेषु नास्ति ?

(A) अश्विनी (B) भरणी

(C) पूषा (D) रोहिणी

**72.** कृत्तिकानक्षत्रस्य स्वामी कोऽस्ति ?

(A) अग्निः (B) वायुः

(C) सूर्यः (D) भगः

**73.** अधोलिखितेषु असङ्गतं युग्मं चिनुत –

(A) उत्तराफाल्गुनी-अर्यमा

(B) चित्रा-त्वष्टा

(C) रेवती-पूषा

(D) धनिष्ठा-ब्रह्मा

**74.** अधोलिखितेषु सुमेलितं युग्मं चिनुत –

| | राशिः | | अधिपतिः |
|---|---|---|---|
| (A) | वृषः, तुला | – | शुक्रः |
| (B) | कन्याः, मिथुनः | – | चन्द्रमाः |
| (C) | मकरः, कुम्भः | – | बृहस्पतिः |
| (D) | मेषः, वृश्चिकः | – | शनिः |

**75.** स्त्रीपुरुषयोर्युग्मः कस्य राशेराकृतिरस्ति ?

(A) मकरस्य (B) मिथुनस्य

(C) कन्यायाः (D) कुम्भस्य

**76.** अधोलिखितेषु कः जलराशिर्नास्ति ?

(A) कर्कः (B) कुम्भः

(C) सिंहः (D) मकरः

**77.** महीसूनुः इत्यस्य अर्थोऽस्ति –

(A) शुक्रः (B) मङ्गलः

(C) राहुः (D) बुधः

**78.** अधोलिखितेषु सुमेलितं चिनुत –

| | | | |
|---|---|---|---|
| (A) | सूर्यः | – | हेलिः |
| (B) | बुधः | – | वक्रः |
| (C) | बृहस्पतिः | – | भृगुः |
| (D) | शनिः | – | क्रूरः |

**79.** अहस्करः इत्यनेन कः सम्बद्धः ?

(A) चन्द्रमाः (B) सूर्यः

(C) बुधः (D) केतुः

**80.** कालः कतिविधोऽस्ति ?

(A) पञ्चविधः (B) चतुर्विधः

(C) षड्विधः (D) सप्तविधः

mpcareer.in

81. आद्यक्षरनिर्देशेन अष्टादशपुराणानां नामनिर्देश: कस्मिन् पुराणे विद्यते ?

(A) भविष्यपुराणे (B) वामनपुराणे

(C) श्रीमद्भागवते (D) देवीभागवते

82. श्रीमद्भागवते पुराणलक्षणसंख्या प्राप्यते –

(A) दश (B) एकादश

(C) द्वादश (D) पञ्चदश

83. भगवदवतारकथा कथ्यते –

(A) आश्रय: (B) मुक्ति:

(C) ईशानुकथा (D) सद्धर्म:

84. "भरणात् प्रजानाच्चैव मनुर्भरत उच्यते ।

निरुक्तवचनेश्चैव वर्षं तद् भारतं स्मृतम् ॥"

इति पद्यं प्राप्यते –

(A) भविष्यपुराणे (B) भागवतपुराणे

(C) वराहपुराणे (D) मत्स्यपुराणे

85. 'नव ब्रह्मा' इत्यत्र क न गण्यते ?

(A) दक्ष: (B) भार्गव:

(C) मरीचि: (D) अङ्गिरस्

86. राजतरंगिण्यनुसारं कौरव पाण्डवानां काल: निर्धारितो वर्तते –

(A) कलिकालस्य 653 वर्षे गते

(B) कलिकालस्य 553 वर्षे गते

(C) कलिकालस्य 453 वर्षे गते

(D) कलिकालस्य 353 वर्षे गते

87. महाभारतस्य भीष्मपर्वे 'गावल्गणी' कस्य नाम वर्तते ?

(A) कृष्णस्य (B) धृतराष्ट्रस्य

(C) सञ्जयस्य (D) दुर्योधनस्य

88. महाभारते युद्धानां धर्मान् के संस्थापयामासु: ?

(A) कुरुपाण्डवसोमका:

(B) कौरवा:

(C) पाण्डवा:

(D) सोमका:

89. वेदार्थादधिकं मन्ये पुराणार्थं वरानने ।

वेदा: प्रतिष्ठिता: सर्वे पुराणे नात्र संशय: ॥

इति पद्यं कस्मिन् पुराणे प्राप्यते ?

(A) अग्निपुराणे (B) वायुपुराणे

(C) भविष्यपुराणे (D) नारदीयपुराणे

90. ''मा वनं छिन्धि सव्याघ्रं, मा व्याघ्राऽनानशन्-वनात्'' इत्यत्र वन-व्याघ्रयोः मध्ये वर्तते –

(A) कार्यकारणभावः

(B) उपकार्योपकारकभावः

(C) साध्यसाधनभावः

(D) अवयव-अवयवीभावः

91. धर्मस्य मूलं किमस्ति ?

(A) उपनिषद् (B) वेदः

(C) दर्शनग्रन्थः (D) आरण्यकग्रन्थः

92. श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।

सम्यक् संकल्पजः कामो धर्ममूलमिदं स्मृतम् ॥

इत्येतद् कस्य कथनमस्ति ?

(A) याज्ञवल्क्यस्य (B) मनोः

(C) गौतमस्य (D) कपिलस्य

93. 'आचारः परमो धर्मः' इति वचनं कस्मिन् ग्रन्थे वर्णितमस्ति ?

(A) गौतमधर्मसूत्रे (B) शतपथब्राह्मणे

(C) ऋग्वेदे (D) मनुस्मृतौ

94. व्यवहारस्य त्रीणि मुख्यानि पदानि सन्ति –

(A) ऋणादानम्

(B) स्त्रीपुंसयोगः

(C) दायभागः

(D) उपर्युक्तानि सर्वाण्यपि

95. प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते ।

तपोनिश्चयसंयोगात्प्रायश्चित्तमिति स्मृतम् ॥

इति कस्य ग्रन्थस्य वचनमस्ति ?

(A) सामविधानब्राह्मणस्य

(B) प्रायश्चित्तविवेकस्य

(C) ऐतरेयब्राह्मणस्य

(D) शतपथब्राह्मणस्य

96. श्राद्धस्य कति प्रकाराः सन्ति ?

(A) नित्यः

(B) नैमित्तिकः

(C) काम्यः

(D) उपर्युक्ताः सर्वेऽपि

mpcareer.in

97. धर्मशास्त्रविषये भाव्यनुसन्धानचिन्तनमधिकृत्य प्रामुख्येन किमाचरणीयम् ?

(A) वेदपठनम्

(B) अस्यां दिशि शोधकार्यमुन्नयनम्

(C) ग्रन्थप्रकाशनम्

(D) उपर्युक्तेषु न कोऽपि

98. 'धर्मशास्त्र का इतिहास' इति नाम्नः ग्रन्थस्य सुप्रसिद्धः लेखकः कोऽस्ति ?

(A) मैक्समूलरः

(B) डॉ. बुलरः

(C) डॉ. पाण्डुरंगवामनः काणे

(D) डॉ. राधाकृष्णन्

99. आधुनिकयुगे प्रामुख्येन धर्मशास्त्रोपयोगः कः वर्तते ?

(A) संस्कृतिरक्षणम्

(B) अर्थार्जनम्

(C) पर्यावरणरक्षणम्

(D) पुण्यार्जनम्

100. देशजातिकुलानां च ये धर्मास्तत्प्रवर्तिताः ।
तथैव ते पालनीयाः प्रक्षुभ्यन्त्यन्यथा प्रजाः ॥
इति कस्य कथनमस्ति ?

(A) पाणिनेः (B) बृहस्पतेः

(C) याज्ञवल्क्यस्य (D) मनोः

101. 'मीमांसा' इति पदे प्रत्ययोऽस्ति –

(A) आप् (B) सन् + टाप्

(C) डाप् (D) चाप्

102. 'मीमांसा' इति पदे मान् धातोः अर्थोऽस्ति –

(A) चिकीर्षा (B) पिपठिषा

(C) जिज्ञासा (D) जिगमिषा

103. "वेदप्रतिपाद्य प्रयोजनवदर्थो............." इति लक्षणमस्ति –

(A) अर्थस्य (B) धर्मस्य

(C) कामस्य (D) मोक्षस्य

104. मीमांसादर्शने धर्मस्य लक्षणं पठितमस्ति –

(A) प्रेरणालक्षणोऽर्थो

(B) क्रियालक्षणोऽर्थो

(C) जिज्ञासालक्षणोऽर्थो

(D) उपर्युक्तेषु न कोऽपि

105. भवितुर्भवनानुकूलो व्यापारविशेषोऽस्ति –

(A) कामना (B) याचना

(C) प्रार्थना (D) भावना

106. 'अंशत्रयम्' कस्यां भावनायां भवति ?

(A) शाब्दीभावनायाम्

(B) विभावनायाम्

(C) उभयोर्मध्ये

(D) कस्यामपि नैव

107. प्रयोजनेच्छाजनितक्रियाविषयव्यापारो भवति –

(A) शाब्दीभावना (B) आर्थीभावना

(C) भावना (D) याचना

108. वेदभागो विधिर्भवति –

(A) अज्ञातार्थज्ञापकः

(B) अर्थज्ञापकः

(C) अर्थबोधकः

(D) ज्ञातार्थज्ञापकः

109. 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इति वाक्यं भवति –

(A) गुणविधिः (B) विधिः

(C) विशिष्टविधिः (D) उभयविधिः

110. कस्य विधेः सहकारिभूतानि षट्प्रमाणानि भवन्ति –

(A) विनियोगविधेः

(B) गुणविधेः

(C) अधिकारविधेः

(D) प्रयोगविधेः

111. कणादप्रणीतं दर्शनम् उच्यते –

(A) न्यायदर्शनम्

(B) मीमांसादर्शनम्

(C) वैशेषिकदर्शनम्

(D) सांख्यदर्शनम्

112. कणादमते पदार्थानां संख्या अस्ति –

(A) 7 (सप्त) (B) 16 (षोडश)

(C) 10 (दश) (D) 24 (चतुर्विंशतिः)

113. 'उपस्कार:' अस्य व्याख्यां –

(A) तत्त्वचिन्तामणे:

(B) दीधिते:

(C) वैशेषिकसूत्रस्य

(D) सांख्यकारिकाया:

114. न्यायमते आत्मा अस्ति –

(A) प्रमाणरूप: (B) वादरूप:

(C) प्रयोजनरूप: (D) प्रमेयरूप:

115. 'तदभाववति तत्प्रकारकं ज्ञानं' किम् उच्यते ?

(A) संशय:

(B) विपर्यय:

(C) स्वप्नसम्बन्धिज्ञानम्

(D) अनध्यवसाय:

116. जातिद्रव्ययो: क: सम्बन्ध: ?

(A) संयोग: (B) विपरीत:

(C) स्वरूपभूत: (D) समवाय:

117. न्यायसूत्रानुसारेण अनुमानानि कति ?

(A) 4 (चत्वारि) (B) 2 (द्वे)

(C) 3 (त्रीणि) (D) 5 (पञ्च)

118. 'असदुत्तरम्' अस्ति –

(A) उपाधि: (B) जाति:

(C) सत्ता (D) मिथ्यावबोध:

119. वात्स्यायनमते 'इयं सर्वविद्यानां प्रदीप:' इति कथ्यते –

(A) कामविद्या

(B) शब्दविद्या

(C) वास्तुविद्या

(D) आन्वीक्षिकी विद्या

120. प्रामाणिकत्वेनाभ्युपगतोऽर्थस्य सिद्धान्तस्य चतुर्षु प्रकारेषु अयम् अन्यतम: नास्ति –

(A) सर्वतन्त्रसिद्धान्त:

(B) प्रतितन्त्रसिद्धान्त:

(C) समवायसिद्धान्त:

(D) अभ्युपगमसिद्धान्त:

121. स्मृतिरूपः परत्र पूर्वदृष्टावभासः कः ?

(A) अध्यासः (B) विवर्तः

(C) आरोपः (D) संज्ञानम्

122. "उत्पन्नात्मावबोधस्य ह्यद्वेष्टृत्वादयो गुणाः" अस्यां कारिकायां वर्णिताः सद्गुणाः............अनुवर्तन्ते ।

(A) रसवत् (B) काव्यवत्

(C) अलंकारवत् (D) आत्मवत्

123. परिणामो नाम –

(A) उपादानविषमसत्ताककार्योत्पत्तिः

(B) उपादानसमसत्ताककार्योत्पत्तिः

(C) अपादानसत्ताविवर्तः

(D) अपादानविषयविमर्शः

124. तत्त्वमसि महावाक्ये वाक्यार्थः सिद्ध्यते –

(A) संसर्गरूपेण

(B) विशिष्टरूपेण

(C) बहुरसत्वेन

(D) अखण्ड-एकरसत्वेन

125. 'क्षीरे सर्पिरिवार्पितम्' कस्य स्वरूपम् ?

(A) अविद्यायाः (B) मायायाः

(C) आत्मनः (D) प्रकृतेः

126. "आनन्दभुक्चेतोमुखः" अत्र चेतोमुखः कः ?

(A) सच्चिदानन्दः

(B) अघोरी

(C) आवरणशक्तिसहितः

(D) विधाता

127. "जन्माद्यस्य यतः" इति सूत्रे 'यतः' इति कीदृशः निर्देशः ?

(A) कारणनिर्देशः

(B) कार्यनिर्देशः

(C) करणनिर्देशः

(D) कार्यकारणनिर्देशः

128. शंकराचार्यस्य पूर्ववर्तिषु आचार्येषु नास्ति वेदान्तस्य आचार्यः –

(A) काशकृत्स्नः (B) गौडपादाचार्यः

(C) राममूर्तिः (D) उपवर्षः

129. अलातशांतिप्रकरणं कस्य ग्रन्थे प्राप्तमस्ति ?

(A) गौडपादस्य (B) आनन्दगिरेः

(C) मधुसूदनस्य (D) चित्सुखाचार्यस्य

130. अवृजिनोऽकामहतः कः ?

(A) सारथिः (B) उद्घातः

(C) अपोहितः (D) श्रोत्रियः

131. 'देहच्छेदो मोक्षः' इत्येदं मतं कस्य ?

(A) वेदान्तदर्शनस्य (B) चार्वाकदर्शनस्य

(C) जैनदर्शनस्य (D) सांख्यदर्शनस्य

132. स्वतः प्रामाण्यवादिनः सन्ति –

(A) नैयायिकाः (B) बौद्धाः

(C) लौकायतिकाः (D) मीमांसकाः

133. सांख्यदर्शने अष्टसिद्धिषु कस्य गणना नास्ति ?

(A) ऊहः (B) शब्दः

(C) रक्षा (D) दानम्

134. क्रियाफलाश्रयत्वं कया प्राप्यते ?

(A) सत्यप्रतिष्ठया (B) अहिंसाप्रतिष्ठया

(C) ब्रह्मचर्यप्रतिष्ठया (D) अस्तेयप्रतिष्ठया

135. शैवागमे शिवस्य संज्ञा अस्ति –

(A) पशुः (B) पतिः

(C) पाशः (D) देवः

136. परमार्थे शून्यस्य अर्थोऽस्ति –

(A) स्वभावशून्यम् (B) सर्वशून्यम्

(C) विनिर्मुक्तः (D) प्रपञ्चशून्यम्

137. सप्तभङ्गीनयोऽस्ति –

(A) स्याद्वादः (B) हीनयानः

(C) शून्यवादः (D) प्रतीत्यसमुत्पादः

138. 'सम्प्रज्ञातः' कस्य भेदः ?

(A) ध्यानस्य (B) धारणायाः

(C) समाधेः (D) प्रत्यक्षस्य

139. काश्मीरं शैवमतं कथ्यते –

(A) औलूक्यदर्शनम

(B) अद्वैतदर्शनम्

(C) आर्हत-दर्शनम्

(D) त्रिक्-दर्शनम्

140. एकविषयिणि त्रीणि साधनानि किमुच्यते ?

(A) यमः (B) संयमः

(C) नियमः (D) साधनम्

141. मुखं विकसितस्मितं वशितविक्रमप्रेक्षितम्
समुच्छलित विभ्रमागतिरपास्त संस्था मतिः ।
उरो मुकुलितस्तनं जघनमंसबन्धोद्धुरम्
वतेन्दुवदनातनौ तरुणिमोद्गमो मोदते ॥

पद्येऽस्मिन् लक्षणायाः कः भेदः ?

(A) रूढाव्यङ्ग्यरहिता लक्षणा

(B) प्रयोजनवती अगूढव्यङ्ग्या लक्षणा

(C) शुद्धालक्षणा

(D) प्रयोजनवतीगूढव्यङ्ग्या लक्षणा

142. सकलप्रयोजनमौलिभूतं काव्यप्रयोजनं किमिति ?

(A) कान्तासम्मिततयोपदेशः

(B) सद्यः परनिर्वृत्तिः

(C) परमपुरुषार्थो मोक्षः

(D) लोकव्यवहारज्ञानम्

143. 'कोमलापरैः' इत्यत्रपरैः शेषैः कोमलावृत्तेः किमपरं नामोक्तम् ?

(A) ग्राम्या (B) पाञ्चाली

(C) मधुरा (D) लाटी

144. 'आसफविलासः'' इति काव्यस्य प्रणेता कः ?

(A) अम्बिकादत्तव्यासः

(B) पण्डितराजजगन्नाथः

(C) अब्दुर्रहीमखानखाना

(D) एतेषु न कश्चित्

mpcareer.in

145. प्रवृत्तिनिवृत्तियोग्यता अर्थक्रियाकारितया व्यक्तौ भवति । तथापि तत्र सङ्केतश्चतुर्विधः स चोपाधावेव । तेषूपाधिषु प्राणप्रदधर्मः कः ?

(A) जातिः (B) व्यक्तिः

(C) गुणः (D) क्रिया

146. सामान्यो वा विशेषो वा तदन्येन समर्थ्यते ।

यत्तु..........साधर्म्येणेतरेण वा ॥

इत्यस्याः कारिकायाः रिक्तस्थानं पूरयत ।

(A) सोऽर्थान्तरन्यासः

(B) सासौ समासोक्तिः

(C) प्रोक्तोपमा सैव

(D) व्यतिरेक इत्याख्यः

147. आधुनिकसंस्कृतकविषु संस्कृतगज्जलविधायाः प्रवर्तकः कः ?

(A) अभिराजराजेन्द्रमिश्रः

(B) राधावल्लभत्रिपाठी

(C) जगन्नाथपाठकः

(D) ओमप्रकाशठक्कुरः

148. पण्डितराजजगन्नाथमते काव्यं कतिविधम् ?

(A) त्रिविधम् (B) चतुर्विधम्

(C) द्विविधम् (D) पञ्चविधम्

149. भुजङ्गप्रयातमित्यस्मिन् छन्दसि कति के च गणाः भवन्ति ?

(A) चत्वारो यगणाः

(B) चत्वारो जगणाः

(C) यगणः तगणः रगणः गुरुः गुरुः

(D) चत्वारो नगणाः

150. संस्कृतभाषायाः प्रथमं वार्तापत्रं काशीविद्यासुधा निधिरिति स्वीक्रियते ।

एतस्य वार्तापत्रस्य प्रकाशनं कदा प्रारब्धम् ?

(A) 4 जून, 1866 ई.

(B) 3 जून, 1866 ई.

(C) 5 अगस्त, 1857 ई.

(D) 15 दिसम्बर, 1900 ई.

mpcareer.in

(SPACE FOR ROUGH WORK)

रफ़ कार्य के लिए जगह

mpcareer.in

(SPACE FOR ROUGH WORK)

रफ़ कार्य के लिए जगह

mpcareer.in